# Yaksharaja Ashtakam ( Dandapani Ashtakam ) Lyrics in Devanagari PDF

श्री यक्षराजाष्टकम्

रत्नभद्राङ्गजोद्भूत ! पूर्णभद्रसुतोत्तम !। निर्विघ्नं कुरु मे यक्ष ! काशीवासं शिवाप्तये ॥ 1 ॥

धन्योयक्षःपूर्णभद्रो धन्याकाञ्चनकुण्डला। ययोर्जठरपीठेऽभूर्दण्डपाणे ! महामते ! ॥ 2 ॥

जययक्षपते ! धीर जयपिङ्गललोचन !। जयपिङ्ग ! जटाभार ! जयदण्ड ! महायुध ! ॥ 3 ॥

अविमुक्तमहाक्षेत्रसूत्रधारोग्रतापस !। दण्डनायक ! भीमास्य ! जयविश्वेश्वरप्रिय ! ॥ 4 ॥

सौम्यानां सौम्यवदनभीषणानां भयानक !। क्षेत्रपापधियांकालमहाकालमहाप्रिय ! ॥ 5 ॥

जय प्राणद ! यक्षेन्द्र ! काशीवासान्नमोक्षद !। महारत्नस्फुरद्रश्मिचयचर्चितविग्रह ! ॥ 6 ॥

महासम्भ्रान्तिजनक ! महोद्भ्रान्तिप्रदायक ! अभक्तानां च भक्तानां सम्भ्रान्त्युद्भ्रान्तिनाशक ! ॥ 7 ॥

प्रान्तनेपथ्यचतुर ! जयज्ञाननिधिप्रद !। जय गौरीपदाब्जाले ! मोक्षेक्षणविचक्षण ! ॥ 8 ॥

यक्षराजाष्टकं पुण्यमिदंनित्यं त्रिकालतः। जपामिमैत्रावरूणे ! वाराणस्याप्तिकारणम् ! ॥ 9 ॥

दण्डपाण्यष्टकंधीमान् जपन्विघ्नैर्नजातुचित्। श्रद्धयापरिभूयेतकाशीवासफलंलभेत्!॥ 10 ॥

॥ इति श्री स्कन्दप्रणीतं श्री यक्षराजाष्टकम् संपूर्णम् ॥

Text Source stotram.co.in
PDF file is generated [ October 11, 2015 ] at Stotram Website